# Kakaradi Kalishatanama Stotram

# કકારાદિકાલીશતનામસ્તોત્રમ્

## Document Information

Text title : kakArAdikAlIshatanAmastotram 1 from Mundamalatantra

File name : kakArAdishata.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Kunal Mukherjee

Proofread by : Kunal Mukherjee, Aruna Narayanan

Description-comments : muNDamAlA tantra. It is ment for daxiNAkAlI.

Latest update : May 9, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 7, 2024

*sanskritdocuments.org*

# કકારાદિકાલીશતનામસ્તોત્રમ્

શ્રીદેવ્યુવાચ-
નમસ્તે પાર્વતીનાથ વિશ્વનાથ દયામય ।
જ્ઞાનાત્ પરતરં નાસ્તિ શ્રુતં વિશ્વેશ્વર પ્રભો ॥ ૧॥

દીનવન્ધો દયાસિન્ધો વિશ્વેશ્વર જગત્પતે ।
ઇદાનીં શ્રોતુમિચ્છામિ ગોપ્યં પરમકારણમ્ ।
રહસ્યં કાલિકાયશ્ચ તારાયાશ્ચ સુરોત્તમ ॥ ૨॥

શ્રીશિવ ઉવાચ-
રહસ્યં કિં વદિષ્યામિ પઞ્ચવક્ત્રૈર્મહેશ્વરી ।
જિહ્વાકોટિસહસ્રૈસ્તુ વક્ત્રકોટિશતૈરપિ ॥ ૩॥

વક્તું ન શક્યતે તસ્ય માહાત્મ્યં વૈ કથઞ્ચન ।
તસ્યા રહસ્યં ગોપ્યઞ્ચ કિં ન જાનાસિ શઙ્કરી ॥ ૪॥

સ્વસ્યૈવ ચરિતં વક્તું સમર્થા સ્વયમેવ હિ ।
અન્યથા નૈવ દેવેશિ જ્ઞાયતે તત્ કથઞ્ચન ॥ ૫॥

કાલિકાયાઃ શતં નામ નાના તન્ત્રે ત્વયા શ્રુતમ્ ।
રહસ્યં ગોપનીયઞ્ચ તત્રેઽસ્મિન્ જગદમ્બિકે ॥ ૬॥

(ૐ) કરાલવદના કાલી કામિની કમલા કલા ।
ક્રિયાવતી કોટરાક્ષી કામાક્ષ્યા કામસુન્દરી ॥ ૭॥

કપાલા ચ કરાલા ચ કાલી કાત્યાયની કુહુઃ ।
કઙ્કાલા કાલદમના કરુણા કમલાર્ચ્ચિતા ॥ ૮॥

કાદમ્બરી કાલહરા કૌતુકી કારણપ્રિયા ।
કૃષ્ણા કૃષ્ણપ્રિયા કૃષ્ણપૂજિતા કૃષ્ણવલ્લભા ॥ ૯॥

કૃષ્ણાપરાજિતા કૃષ્ણપ્રિયા ચ કૃષ્ણરૂપિની ।

કાલિકા કાલરાત્રીશ્ચ કુલજા કુલપણ્ડિતા ॥ ૧૦॥

કુલધર્મપ્રિયા કામા કામ્યકર્મવિભૂષિતા ।
કુલપ્રિયા કુલરતા કુલીનપરિપૂજિતા ॥ ૧૧॥

કુલજ્ઞા કમલાપૂજ્યા કૈલાસનગભૂષિતા ।
કૂટજા કેશિની કામ્યા કામદા કામપણ્ડિતા ॥ ૧૨॥

કરાલાસ્યા ચ કન્દર્પકામિની રૂપશોભિતા ।
કોલમ્બકા કોલરતા કેશિની કેશભૂષિતા ॥ ૧૩॥

કેશવસ્યપ્રિયા કાશા કાશ્મીરા કેશવાર્ચ્ચિતા ।
કામેશ્વરી કામરૂપા કામદાનવિભૂષિતા ॥ ૧૪॥

કાલહન્ત્રી કૂર્મમાંસપ્રિયા કૂર્માદિપૂજિતા ।
કોલિની કરકાકારા કરકર્મનિષેવિણી ॥ ૧૫॥

કટકેશ્વરમધ્યસ્થા કટકી કટકાર્ચ્ચિતા ।
કટપ્રિયા કટરતા કટકર્મનિષેવિણી ॥ ૧૬॥

કુમારીપૂજનરતા કુમારીગણસેવિતા ।
કુલાચારપ્રિયા કૌલપ્રિયા કૌલનિષેવિણી ॥ ૧૭॥

કુલીના કુલધર્મજ્ઞા કુલભીતિવિમર્દ્દિની ।
કાલધર્મપ્રિયા કામ્ય-નિત્યા કામસ્વરૂપિણી ॥ ૧૮॥

કામરૂપા કામહરા કામમન્દિરપૂજિતા ।
કામાગારસ્વરૂપા ચ કાલાખ્યા કાલભૂષિતા ॥ ૧૯॥

ક્રિયાભક્તિરતા કામ્યાનાઞ્ચૈવ કામદાયિની ।
કોલપુષ્પમ્બરા કોલા નિકોલા કાલહાન્તરા ॥ ૨૦॥

કૌષિકી કેતકી કુન્તી કુન્તલાદિવિભૂષિતા ।

ઇત્યેવં શ‍ૃણુ ચાર્વઙ્ગિ રહસ્યં સર્વમઙ્ગલમ્ ॥ ૨૧॥

ફલશ્રુતિઃ-
યઃ પઠેત્ પરયા ભક્ત્યા સ શિવો નાત્ર સંશયઃ ।
શતનામપ્રસાદેન કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૨૨॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ વાસવાદ્યા દિવૌકસઃ ।

રહસ્યપઠનાદ્દેવિ સર્વે ચ વિગતજ્વરાઃ ॥ ૨૩॥

ત્રિષુ લોકેશુ વિશ્વેશિ સત્યં ગોપ્યમતઃ પરમ્ ।
નાસ્તિ નાસ્તિ મહામાયે તન્ત્રમધ્યે કથઞ્ચન ॥ ૨૪॥

સત્યં વચ્મિ મહેશાનિ નાતઃપરતરં પ્રિયે ।
ન ગોલોકે ન વૈકુણ્ઠે ન ચ કૈલાસમન્દિરે ॥ ૨૫॥

રાત્રિવાપિ દિવાભાગે યદિ દેવિ સુરેશ્વરી ।
પ્રજપેદ્ ભક્તિભાવેન રહસ્યસ્તવમુત્તમમ્ ॥ ૨૬॥

શતનામ પ્રસાદેન મન્ત્રસિદ્ધિઃ પ્રજાયતે ।
કુજવારે ચતુર્દશ્યાં નિશાભાગે જપેત્તુ યઃ ॥ ૨૭॥

સ કૃતી સર્વશાસ્ત્રજ્ઞઃ સ કુલીનઃ સદા શુચિઃ ।
સ કુલજ્ઞઃ સ કાલજ્ઞઃ સ ધર્મજ્ઞો મહીતલે ॥ ૨૮॥

રહસ્ય પઠનાત્ કોટિ-પુરશ્ચરણજં ફલમ્ ।
પ્રાપ્નોતિ દેવદેવેશિ સત્યં પરમસુન્દરી ॥ ૨૯॥

સ્તવપાઠાદ્ વરારોહે કિં ન સિદ્ધ્યતિ ભૂતલે ।
અણિમાદ્યષ્ટસિદ્ધિશ્ચ ભવેત્યેવ ન સંશયઃ ॥ ૩૦॥

રાત્રૌ બિલ્વતલેઽશ્વથ્થમૂલેઽપરાજિતાતલે ।
પ્રપઠેત્ કાલિકા-સ્તોત્રં યથાશક્ત્યા મહેશ્વરી ॥ ૩૧॥

શતવારપ્રપઠનાન્મન્ત્રસિદ્ધિર્ભવેદ્ધ્રૂવમ્ ।
નાનાતન્ત્રં શ્રુતં દેવિ મમ વક્ત્રાત્ સુરેશ્વરી ॥ ૩૨॥

મુણ્ડમાલામહામન્ત્રં મહામન્ત્રસ્ય સાધનમ્ ।
ભક્ત્યા ભગવતીં દુર્ગાં દુઃખદારિદ્ર્યનાશિનીમ્ ॥ ૩૩॥

સંસ્મરેદ્ યો જપેદ્ધ્યાયેત્ સ મુક્તો નાત્ર સંશય ।
જીવન્મુક્તઃ સ વિજ્ઞેયસ્તન્ત્રભક્તિપરાયણઃ ॥ ૩૪॥

સ સાધકો મહાજ્ઞાની યશ્ચ દુર્ગાપદાનુગઃ ।
ન ચ ભક્તિર્ન વાહભક્તિર્ન મુક્તિનગનન્દિનિ ॥ ૩૫॥

વિના દુર્ગાં જગદ્ધાત્રી નિષ્ફલં જીવનં ભભેત્ ।
શક્તિમાર્ગરતો ભૂત્વા યોહન્યમાર્ગે પ્રધાવતિ ॥ ૩૬॥

ન ચ શાક્તાસ્તસ્ય વક્ત્રં પરિપશ્યન્તિ શઙ્કરી ।
વિના તન્ત્રાદ્ વિના મન્ત્રાદ્ વિના યન્ત્રાન્મહેશ્વરી ॥ ૩૭॥

ન ચ ભુક્તિશ્ચ મુક્તિશ્ચ જાયતે વરવર્ણિની ।
યથા ગુરુર્મહેશાનિ યથા ચ પરમો ગુરુઃ ॥ ૩૮॥

તન્ત્રાવક્તા ગુરુઃ સાક્ષાદ્ યથા ચ જ્ઞાનદઃ શિવઃ ।
તન્ત્રઞ્ચ તન્ત્રવક્તારં નિન્દન્તિ તાન્ત્રીકીં ક્રિયામ્ ॥ ૩૯॥

યે જના ભૈરવાસ્તેષાં માંસાસ્થિચર્વણોદ્યતાઃ ।
અતએવ ચ તન્ત્રજ્ઞં સ નિન્દન્તિ કદાચન ।
ન હસ્તન્તિ ન હિંસન્તિ ન વદન્ત્યન્યથા બુધા ॥ ૪૦॥

॥ ઇતિ મુણ્ડમાલાતન્ત્રેઽષ્ટમપટલે દેવીશ્વર સંવાદે
કાલીશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Kunal Mukherjee

*Kakaradi Kalishatanama Stotram*

pdf was typeset on November 7, 2024

Please send corrections to *sanskrit@cheerful.com*